National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 40-45
© 2026 NJHSR
www.sanskritarticle.com

**हरिश्चन्द्रः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**मार्गदर्शकः**
**प्रो.सनन्दनकुमारत्रिपाठी**
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

**Correspondence:**
**हरिश्चन्द्रः**
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः

# 'कविवररामलखनपाण्डेयस्य कृतीनां परिचयात्मकं विवेचनम्'

**हरिश्चन्द्रः, प्रो.सनन्दनकुमारत्रिपाठी**

**सारांशः (Abstract)**

प्रस्तुतशोधपत्रम् **'कविवररामलखनपाण्डेयस्य कृतीनां परिचयात्मकं विवेचनम्'** इति विषये आधारितम् अस्ति। अस्मिन् शोधपत्रे आधुनिकसंस्कृतसाहित्यस्य मूर्धन्यकवेः आचार्यरामलखनपाण्डेयस्य व्यक्तित्वस्य, तेषां प्रमुखकृतीनाञ्च सविस्तरं विवेचनं कृतम्। आचार्यपाण्डेयः १९५५ ईसवीये झारखण्डराज्यस्य हजारीबागजनपदे हर्पवाग्रामे अजायत। सः कविः, नाटककारः, सम्पादकः, समीक्षकः, आचार्यश्च वर्तते। तेन रचिताः प्रमुखाः कृतयः सन्ति यथा गानायनी, गीतिकालहरी, एकाग्रभारतम्, शब्दार्थप्रकाशः, शाकुन्तलं धर्मविज्ञानञ्च। गानायनी-गीतिकाव्यं त्रिधा विभक्तम् - मानवगीतिः, संस्कृतगीतिः, भावाञ्जलिश्च। अत्र भारतीयज्ञानतत्त्वानि सन्निहितानि सन्ति। कविः कथयति **"सेयं गानायनी नाम यदि केनापि गीयते। सौभाग्यं जनयेदेव तदेतन्मम दैवतम्॥**[1] गानस्य महत्त्वं वर्णयन् कविः कथयति **"जपकोटिगुणं ध्यानं ध्यानकोटिगुणो लयः। लयकोटिगुणं गानं गानात्परतरं न हि॥**[2] गीतिकालहर्याम् एकषष्टिः गीतयः सन्ति। तासु राजनीतिः, संस्कृतिः, मानवता, राष्ट्रप्रेम, शिक्षा, नीतिः, पर्यावरणम् इत्यादयः विषयाः विचिताः सन्ति । द्वन्द्वगीते कविः समाजस्य समस्यानां समाधानं मार्गयति "लोके परितो द्वन्द्वविधानम्। द्वन्द्वे द्वन्द्वे गीतमुज्ज्वलं गीतं द्वन्द्वनिदानम्॥ एकाग्रभारतं पञ्चाङ्कात्मकं नाटकं महाभारताश्रितम् अस्ति। अस्य वीररसः प्रधानः वर्तते। द्रोणाचार्यः शिष्यान् उपदिशति **"शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते। शस्त्रसञ्चालने तस्मादेकाग्रीक्रियतां मनः॥**[3] प्रथमाङ्के धनुर्विद्याध्ययनम्, द्वितीये प्रयोगपरीक्षा, तृतीये एकलव्यस्य अङ्गुष्ठदानम्, चतुर्थे प्रतिशोधमैत्री, पञ्चमे शिवाविर्भावः वर्णितः च एते विषयाः वर्णिताः सन्ति। शब्दार्थप्रकाशः काव्यशास्त्रीयः ग्रन्थः अस्ति। अत्र शब्दार्थयोः साहित्यं प्रतिपादितम् "शब्दार्थप्रवणा सृष्टिः शब्दार्थोद्भावि तत्फलम्। शब्दार्थावेव लोकेऽस्मिन् लोकोत्तरतया मतौ॥[4] शाकुन्तलं धर्मविज्ञानम् इति ग्रन्थे कालिदासीयशाकुन्तले धर्मविज्ञानस्य समीक्षा कृता। आचार्यः कथयति यत् धन्या वसुमती यत्रोल्लासि शाकुन्तलं वियत् । विना धर्मस्य विज्ञानं न तत्केनापि वीक्ष्यते॥[5] एवम् आचार्यपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य संवर्धने अपूर्वं योगदानं कृतवान्। तस्य कृतयः भारतीयसंस्कृतेः, धर्मस्य, राष्ट्रचेतनायाः, मानवमूल्यानाञ्च गभीरं दर्शनं प्रस्तुवन्ति। आधुनिकसंस्कृत-साहित्ये तस्य स्थानं चिरस्मरणीयम्।

## भूमिका (Introduction)

संस्कृतसाहित्यं भारतीयसंस्कृतेः प्राणस्वरूपं वर्तते। युगे युगे अनेके कवयः, नाटककाराः, समीक्षकाः, विचारकाः च संस्कृतसाहित्यस्य समृद्धिमकुर्वन्। आधुनिकसंस्कृतसाहित्ये विंशतितमशताब्द्याः उत्तरार्धे एकविंशतितमशताब्द्याश्च अनेके प्रतिभाशालिनः लेखकाः अभवन्। तेषु अन्यतमः आचार्यरामलखनपाण्डेयः वर्तते। अयं महानुभावः केवलं कविरेव न, अपितु नाटककारः, सम्पादकः, समीक्षकः, आचार्यश्च अस्ति। अस्य बहुमुखप्रतिभायाः परिचयः अस्य विविधासु कृतिषु दृश्यते।

आधुनिकसंस्कृतसाहित्यस्य विशालायां समृद्धायां च परम्परायां ये केचन विद्वांसः स्वकीयकाव्यप्रतिभया साहित्यलोकं विभूषितवन्तः, तेषु रामलखनपाण्डेय इति नाम विशेषतया उल्लेखनीयम् अस्ति। सः न केवलं प्रख्यातः कविः, अपि तु साहित्यशास्त्रस्य मूर्धन्यः आचार्यः अस्ति। राष्ट्रियसंस्कृतसंस्थानम् इत्यस्य लक्ष्मणपुरपरिसरे साहित्य-विभागस्याध्यक्षत्वेन कार्यं कृत्वा सः शिक्षाक्षेत्रेऽपि महत्त्वपूर्णं योगदानं दत्तवान्। आचार्यरामलखनपाण्डेयस्य काव्यरचनाः विषयवैचित्र्येण, भाषासौष्ठवेन, भावगाम्भीर्येण च समन्विताः सन्ति। साहित्यशास्त्रस्य विविधासु विधासु, महाकाव्ये, गीतिकाव्ये, गद्यकाव्ये, रूपके, शतककाव्ये च तस्य सृजनशीलता प्रस्फुटिता दृश्यते। 'शाकुन्तलं धर्मविज्ञानम्', 'गानायनी', 'गीतिकालहरी', 'एकाग्रभारतम्', 'शब्दार्थप्रकाशः' इत्यादयः तस्य प्रमुखग्रन्थाः आधुनिकसंस्कृतसाहित्ये विशिष्टं स्थानं धारयन्ति। एतेषु ग्रन्थेषु राष्ट्रभावना, सांस्कृतिकमूल्यानि, आध्यात्मिकचिन्तनं, भाषिकवैदुष्यं च समुचितरीत्या प्रकटितम् अस्ति। आधुनिकसंस्कृतसाहित्यस्य संवर्धने, परम्परारक्षणे, नूतनविचारप्रवर्तने च पाण्डेयवर्यस्य योगदानम् अत्यन्तं महत्त्वपूर्णम् अस्ति। तस्य काव्यानि न केवलं साहित्यरसमयी सन्ति, अपि तु समाजोपयोगिनि, संस्कारवर्धकानि च भवन्ति। अस्य शोधपत्रस्य उद्देश्यः कविवररामलखनपाण्डेयस्य विविधकृतीनां परिचयं प्रदातुं, तासां साहित्यिकवैशिष्ट्यस्य विवेचनं कर्तुम्, आधुनिकसंस्कृतसाहित्ये तासां स्थानं निर्धारयितुं च अस्ति। एतत् अध्ययनं न केवलं तस्य साहित्यसेवायाः मूल्यांकनाय सहायकं भविष्यति, अपि तु आधुनिकसंस्कृतसाहित्यपरम्परायाः व्यापकदृष्ट्या अवगमनाय अपि मार्गदर्शकं भविष्यति।

प्रस्तुते शोधपत्रे आचार्यपाण्डेयस्य प्रमुखकृतीनां परिचयात्मकं विश्लेषणं क्रियते। अत्र गानायनी, गीतिकालहरी, एकाग्रभारतम्, शब्दार्थप्रकाशः, शाकुन्तलं धर्मविज्ञानम् इत्यासां कृतीनां सविस्तरं परिचयः, वैशिष्ट्यं, साहित्यिकं योगदानं च प्रतिपाद्यते।

**प्रतिपाद्यविषयः**

**कविवररामलखनपाण्डेयस्य तत्कृतीनाञ्च परिचयः**

संस्कृतसाहित्यस्योद्भट्टविद्वान् आचार्यरामलखनपाण्डेयः आधुनिक-संस्कृतसाहित्यस्य एकविंशतितमशताब्द्याःमूर्द्धन्यकविः, लब्धप्रतिष्ठा कविः, नाटककारः , सम्पादकः, समीक्षकश्च वर्तते। अस्याचार्यस्य आविर्भाकालः पञ्चपञ्चाशदुत्तरैकोनविंशतितमे ( 1955) ईस्वीये वर्षे भारतराष्ट्रस्य झारखण्डराज्यान्तर्गते हजारीबागजनपदे, हपवा इति नामके ग्रामे अजायत्। एतस्य पितुर्नाम पण्डितः स्व. श्रीमहावीरपाण्डेयः आसी ।माध्यमिकशिक्षानन्तरं काशीहिन्दू विश्व-विद्यालयस्य प्राच्यविद्याधर्मविज्ञानसंकाये साहित्यशास्त्रीकक्षा-माचार्यकक्षां चोत्तीर्णवान्। मध्यप्रदेशस्य सागरविश्व-विद्यालये एम. ए. कक्षां सर्वाधिकैरंकैरुत्तीर्य तत्रैव 1985 ख्रिस्ताब्दे पी.एच.डी. शोधोपाधिमर्जितवान् सागरविश्वविद्यालये काशीविद्यापीतेकाशीस्थे हरिश्चन्द्रस्नातकोत्तरमहा-विद्यालये चाल्पाल्पकाले नाध्याप्य 1987 ई० वर्षे दिल्लीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य व्याख्यातृपदे नियुक्तः प्रोन्नतश्च सम्प्रति लक्ष्मण-पुरीस्थ राष्ट्रियसंस्कृतसंस्थानपरिसरे प्रवाचकतया संस्कृतसाहित्यम् असेवत।

एवमेव अस्याम् आधुनिककविपरम्परायाम् **आचार्यः रामलखन-पाण्डेयोऽपि** वर्तते। प्रोरामलखनपाण्डेयः राष्टियसंस्कृतसंस्थानस्य लक्ष्मणपुरपरिसरे साहित्यविभागस्याचार्योऽध्यक्षश्च आसीत्। आचार्येण साहित्यशास्त्रे नैकाः कृतयः अकारिषत । साहित्यशास्त्रस्य विविधाःविधाःवर्तन्ते तेषु महाकाव्यं, गीतिकाव्यं, रूपकं, गद्यकाव्यं, संदेशकव्यं,खण्डकाव्यं,शतककाव्यम् इत्यादयः वर्तन्ते। पाण्डेयवर्येण-शाकुन्तलं धर्मविज्ञानम्, गानायनी, गीतिकालहरी, एकाग्रभारतम् , शब्दार्थप्रकाशश्चेत्यादयः अनेकाः रचनाः कृताः ।

कविवररामलखनपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य संवर्धने अपूर्वं योगदानं कृतवान् ।सः विशिष्टः प्रख्यातश्च विद्वान् वर्तते। आधुनिकसंस्कृतसाहित्ये तेषां काव्यकृतयः अत्यन्तं उपयोगिन्यो वर्तन्ते । समाजस्य कृते अपि अत्यन्तं महत्त्वपूर्णाः ताः रचनाः भवन्ति।

संस्कृतसाहित्यशास्त्रं व्यापकं वर्तते। अस्मिन् साहित्यशास्त्रे बहुविधानि काव्यानि वर्तन्ते। तेषु श्रव्यकाव्यानि दृश्यकाव्यानि मिश्रितकाव्यानि च वर्तन्ते। श्रव्यकाव्येषु महाकाव्यं गीतिकाव्यञ्च महत्त्वपूर्णं स्थानं धारयतः। कविवररामलखनपाण्डेयः साहित्यशास्त्र-स्य मूर्धन्यः आचार्यः कविश्च वर्तते। अनेन महोदयेन गानायनी, गीतिकालहरी, एकाग्रभारतम्, शब्दार्थप्रकाशः इत्यादयः अनेके ग्रन्थाः रचिताः। कविवररामलखनपाण्डेयेन विशिष्टं गानायनी-गीतिकाव्यं विरचितम्। अस्मिन् गीतिकाव्ये भागत्रयं वर्तते – मानवगीतिः संस्कृतगीतिः भावाञ्जलिश्च। अत्र नानाविधानि भारतीयज्ञानतत्त्वानि सन्निहितानि सन्ति।

**गानायनी**

इदमेकं गीतिकाव्यं वर्तते। संस्कृतवाङ्मये गीतिकाव्यानां महती परम्परा विलसति। अत्र प्रस्तुते गीतिसंग्रहे यस्त्रिधा वस्तुविभागः कृतस्तत्र मानवगीतिषु गेयता समधिका शास्त्रानुसारिणी चास्ति। संस्कृतगीतिषु संस्कृतस्याधुनिक स्वत्वं महत्त्वं वा गीयते। भावाञ्जलौ देवादिविषया रतिरपि गेयतायां समायोजिता।

अत्र गीतिकाव्ये रागपरा भाव-पराश्च विशेषताः सन्ति। गेय-तायां विचाराणां सरणिरस्ति। विचारेषु विविधाभावाः परि-स्फरन्ति। भावेषु विश्वतोमुखी या मनुष्यता, सा भारतीयता-मधिकृत्य प्रवर्तते। अधुनातनं भारतं बहुधा समीक्ष्यते। भार-तीयस्वरूपविज्ञाने वैश्वीकरण-विधाने च प्राच्यपरम्परानुसं-धानं नूतनमावश्यकम् ।

**सेयं गानायनी नाम यदि केनापि गीयते ।**
**सौभाग्यं जनयेदेव - तदेतन्मम दैवतम् ।।**[6]

**सन्ततं दृढसंसक्तं वन्दे द्वन्द्वं चिरन्तनम् ।**
**आदर्श केवलं पश्यदाननाभां परस्परम् ।।**[7]

**चक्रकवेः ।**

**यन्माधवे सा स्फुरितेन चक्षुषा गोपाङ्गना भावमधत्त मञ्जुलम्।**
**तदेकतानेन ददर्श राधिका निशां सचन्द्रामिव सूनरी हयुषा।।**[8]

**कस्यापि।**

स्वपुस्तकनामकरणविषये 'मानव' इति प्रथमः शब्दो गृहीतः। गीतितत्त्वानां चात्र पुस्तके प्राधान्यमवलोक्य 'गीत' मिति द्वितीयं पदमपि नामकरणे संकलितम्। पुस्तकस्य गीतसंग्रहपरत्वाच्चान्ते 'अञ्जलि' रिति संग्रहपर्यायप्रख्यापक पदमादत्तम्। तदेवं "मानव-गीताञ्जलि "रिति नामकरणं सम्पन्नम्। एतस्य हि नाम्नोऽन्वर्थता पुस्तकस्थवस्तुविभागक्रमे मानवगीतिप्राधान्यतया प्रकारान्तरेणापि संभवति । अतः मानवीयतत्त्वानां गीतितत्त्वानां च प्राधान्यमवलोक्य मानवगीताञ्जलिरिति नाम पूर्वतो निर्धारितमासीत्। किन्चने गत्वा तन्नामकरणे विक्षेपः कश्चिदापतितः। पुस्तकस्य नामनि मानव-गीतिरिति प्रथमो वस्तुविभागः कृतः वर्तते। स एव प्रथमो गीतिविभागः प्राथम्यादप्रेतनं द्वित्तयमपि वस्तुविभागं व्याप्नुयादिति सयुक्तिक सदपि तन्नामकरणं सुस्थिरं नाभूत्। यतो हि मानवगीताञ्जलिरिति नामनि मानवशब्दो गीतशब्दश्चेति द्वावेतौ शब्दौ परस्परं कलहायितौ। प्रथमे वस्तुविभागाभिधाने द्वयोरपि तयोः शब्दयोर्ग्रहणं कृत्वापि सम्पूर्णकृतेरभिधाने तावदेक एव गीतापरपर्यायः शब्दः पर्याप्ततया मया स्वीकृतः।[10]

यद्यपि प्रकाशमाने खल्वेतस्मिन् काव्यबन्धे मानव एव मूलतया ममाभिप्रेतस्तथापि नाधुनिके मानवे सृष्टिगता समग्रता विलोक्यते। गीते गाने वा सा समग्रता नूनमवलोक्यते । तस्मादेतस्य गीतसंग्रहस्य "गानायनी" इति नवं नाम गानविषयकगरिमाणमाकलय्य निर्धारितम्। गानविषयकं गौरवं तावदेवं श्रूयते-

**जपकोटिगुणं घ्यानं घ्यानकोटिगुणो लयः ।**
**लयकोटिगुणं गानं गानात् परतरं न हि ।।**[11]

संस्कृतवाङ्मये गीतिकाव्यानां महती परम्परा विलसति । तत्र ममायं प्रयासो नितरां क्षुद्रः प्रतिभाति। अत्र प्रस्तुते गीतिसंग्रहे यस्त्रिघा वस्तुविभागः कृतस्तत्र मानवगीतिषु गेयता समधिका शास्त्रानुसारिणी चास्ति। संस्कृतगीतिषु संस्कृतस्याधुनिकं स्वत्वं महत्त्वं वा गीयते। भावाञ्जली देवादिविषया रतिरपि गेयतायां समायोजिता ।

**मानवगीतिः**

मानवगीतिषु पौराणिकानि कानिचिदाख्यानानि संस्पृश्यन्ते। तथात्वेन तत्र 6, 7, 8, 33, 34, 35, 36, 45, 46, 53, 54, 64, 83, 89, 100, 105 संख्याकानि पद्यानि द्रष्टव्यानि सन्ति। प्रतिपद्यं चतुर्थचरणं समानमिति प्रोक्तम्। गीतितत्त्वानुरोधवशादत्र प्रथम-च्छन्दःप्रयोगावसरे पद्यस्थद्वितीयचरणगतमानवशब्दपूर्वप्राप्तः सन्धि-र्वैकल्पिकः स्वीकृतः। उदाहरणाय चतुर्दशे पद्ये "इतोऽभ्युपैति निषादः मानव ततश्चाथ मुनिपादः" इत्यत्र निषादमानवशब्दयोर्मध्ये विसर्गस्योत्वगुणरूपः सन्धिर्न विहितः। एवमेव "परितो विलसतु शान्तिः मानव सेव्या सहजा क्रान्तिः" इति पञ्चाशत्तमस्य पद्यस्य द्वितीयचरणे मानवशब्दपूर्ववर्तिरेफात्मक-विसर्गसन्धिर्नादृतः। तेन तत्रोभयोरपि गीतिखण्डयोरन्त्यानुप्रासो न भज्यत इति गेयताया लाभो भवति ।[12]

**संस्कृतगीतिः**

संस्कृतगीतिषु न केवलं भाषाविशेषस्तुतिरेव पुरस्कृता, अपितु संस्कृतविद्याविषयकः साम्प्रतिको विचारोऽपि गीतिमुखेनार्पितः। उदाहरणाय संस्कृतं प्रति संस्कृतज्ञानां नेत्रनिमीलनम्, विकासक्रमे संस्कृतस्य स्वरूपहानिः, संस्कृतस्य भारतीयतायाश्च परस्परमन्वय-व्यतिरेकिसम्बन्धः, संस्कृतेनैव मानवमूल्यसंवर्धनं चेत्यादयो विचारास्तत्र संस्कृतोन्नायकसंकल्पोद्भावनकामनया गेयतायामपि गुम्फिताः ।

भावाञ्जलौ प्रकीर्णा अपि विचारा विविधभावपरास्त्रिधा समुप-तिष्ठन्ते - देवभक्तिपराः, लोकगीतपराः, गद्यायिताश्चेति। गीतिकाव्य-परम्परायां गीतं गद्यायितमपि बहुलतया विलोक्यते। तस्माद् भावाञ्जलिमध्ये यदार्याभेदेषु गद्यमयताऽवलोक्यते, सा न हि गीतिविरहिता वक्तुं युज्यते। लोकगीतधिया तत्र 114-116, 126-134, 153-156, 163-165, 168-170, 172-178 संख्याकानि गीतिपद्यानि द्रष्टव्यानि भवन्ति। देवस्तुतिदृष्ट्या विष्णु-राम-कृष्ण-शिव-शक्ति-गङ्गा-सरस्वती-प्रजापति-सूर्यादिपराः काव्योचितभावा विलोकनीयाः सन्ति ।[13]

**भावाञ्जलिः**

भावाञ्जलिगतकतिपयप्रकीर्णपद्यविनिर्माणसमये मम मनसि बलादयं संशयः समजनि यदिदमिदं पां मयि स्फुरितमपि कदाचिन्न मदीयमपितु मत्पूर्ववर्तिनः कस्यचिदन्यस्य, यत्काव्याध्ययनसंस्कार-वशादविकलतया-धुनाऽस्मदीयस्मृतिपथमुपगतमिति । यदि ममैतस्य पुस्तकस्य केऽपि समीक्षकाः स्युस्तानहं यथार्थ सूचयितुं सादरं सप्रश्रयं याचे। नाहं तावदन्यथाभियोग सतृणाभ्यवहारित्वं वा कदाचिदीहे। ममेयं कृतिर्मुक्तकतयैव प्रायशश्चेतसि करणीयं सचेतोभिरित्यपि ममास्ति निवेदनम्। गानायनीगतगीतित्रयपुष्पिकासु रालपा इति यन्नामोल्लेखः कृतस्तत्र मन्नामशब्दत्रयाद्यक्षरसंयोगः सविधेयः। पुस्तकमिदमुत्तरप्रदेशसंस्कृतसंस्थानस्यार्थिकसहायतया प्रकाशितं भवतीति संस्थानस्यास्य कृतज्ञतामावहामि।[14]

**मानवगीतिः संस्कृतगीतिरथ भावाञ्जलिश्चेति।**
**तिसृभिर्गीतिभिर्गायामि वा त्रिवारमञ्जलिं निबध्नामि वा ।।**[15]

**गीतिकालहरी –**

गीतिकालहरीइत्यस्मिन् ग्रन्थे कविवर्येण रामलखनपाण्डेयेन् रचितानि एकषष्टिः गीतिकानि समाविष्टानि सन्ति। एषः ग्रन्थः

गीतिकाव्यरूपेण आधुनिकसाहित्ये एकं मनोहरं स्थानं धारयति। अस्य गीतिनां विषयवस्तु विविधानि मानवजीवनसंबद्धानि आयामान् आवृणोति—राजनीतिः, संस्कृतसंस्कृतिः, मानवता, राष्ट्रप्रेम, शिक्षाया महत्वं, तन्त्रविधानम्, नीतिशास्त्रम्, पर्यावरणम्, विज्ञानम्, अध्यात्मम्, काव्यमर्मविवेचनं च।

प्रत्येकं गीतं स्वविषये सुस्पष्टं सन्देशं वहति। कविना यत्र तत्र शब्दचित्रणम्, अनुप्रासयुक्तपदविन्यासः, रसात्मकप्रस्तावना च सम्यक् प्रयुक्ता। गीतीनां शीर्षिकाः एव तत्सम्बद्धं भावलोकं सूचयन्ति यथा मौनम्, राजनीतिः, वर्धापनम्, नवगिरिधारी, कविः, नासा, दिशा इत्यादयः शीर्षिकाः कवेः चिन्तनगौरवं स्पष्टरूपेण प्रकाशयन्ति।

एषः ग्रन्थः केवलं साहित्यिकं सौन्दर्यं न उपस्थापयति, अपि तु समसामयिकविषयान् प्रति जनचेतनाम् अपि जाग्रयति। कविना गीतरूपेण सामाजिकानां मूल्यनां, सांस्कृतिकपरम्पराणां च संवर्धनाय यत्नः कृतः। संस्कृतभाषायामिदं काव्यं नूतनायमानां रसिकानां कृते प्रेरणास्रोतः भवति। एवं "गीतिकालहरी" इत्यस्मिन्ग्रन्थे कविना गीतिकाव्ये नवीनप्रयोगाः, लोकोपयोगिता च सुन्दररूपेण समन्विता, तेन अयं ग्रन्थः न केवलं साहित्यदृष्ट्या, अपि तु सामाजिकदृष्ट्या अपि परममूल्यवान् वर्तते।

अस्मिन् ग्रन्थे एकषष्टिः गीतयः वर्तन्ते। तासां नामानि १ द्वन्द्वगीतम् . २ सविता .३ कविता .४ संस्कृतम् .५भा .रतम् "क" ६ "ख" भारतम् .७ भरतचतुष्टयम् .८ अम्लानम् .६ .मौनम् .१० . "क" नीतिः ११ "ख" नीतिः .१२ सन्ध्या .१३ .तन्त्रणम् .१४ .उपा . १५ कविकर्म .१६ म्लानम् .१७ राजनीतिः .१८ राष्ट्रम् . १९ संस्कारः२० विधानम् .२१ .मानवता २२ कर्म .२३ . विपर्यासः२४ .पूर्वापरम् २५ कस्त्वम् .२६ अद्यतनम् .२७ वचोविधानम२८ सन्तुलनम् .२९. उत्थानम्. ३०. प्राची.... ३१. एकतानम् ३२. चिन्तास्पदम् ३३. शिक्षापदम् ३४. जितेन्द्रियः ३५. यमुना ३६. दीनाः ३७. वाग्वन्दनम् "क" ३८. वाग्वन्दनम् "ख" ३9. स्वागतम् ४०. अभिनन्दनम् ४१. नवयुगम् ४२. वर्धापनम्. ४३. बलादपि ४४. कटुमधु ४५. करणीयम् ४६. मूलधनम् ४७. नासा ४८. विश्वसंस्कृतम् ४६. समयः ५०. पारे. ५१. काली ५२. कविः ५३. वसन्तः ५४. भ्रमरः ५५. नवगिरिधारी ५६. सौम्या ज्वाला ५७. दिशा ५८. नापरा ५६. अधिमानम् ६०. स्वच्छम्. ६१. स्वरः, उपसंहरणम् ।

**एकाग्रभारतं नाटकम्**

पाण्डेयमहोदयेन महाभारताश्रितम् एकाग्रभारतं नाटकं विरचितम् । अस्मिन् नाटके पञ्च अङ्काः वर्तन्ते । एकाग्रभारतमिति नाटकस्य कथावस्तु प्रख्यातम् ऐतिहासिकं वर्तते। अस्य नाटकस्य अङ्गिरस-रूपेण वीररसः विहितोऽस्ति। युगेऽस्मिन् भारतीयां व्यवस्थां प्रतिपालयितुं हस्तिनापुर-राजकीय-गुरुकुले छात्रधर्मोचित्तं धनुर्वेद-विद्याव्रतं प्रवर्तमानं वर्तते। अस्मिन् गुरुकुले पाण्डवाः कौरवाश्च विद्यां प्राप्नुवन्तः आसन्। नाटकस्य प्रमुखपात्राणि एवं विद्यन्ते यथा द्रोणाचार्यः, एकलव्यः, अर्जुनः, भीमसेनः, युधिष्ठिरः, नकुलः, दुर्योधनः, दुःशासनः, सहदेवः, कर्णः, द्रुपदश्च इमानि पात्राणि वर्तन्ते।

**सूत्रधारः - (प्रविश्य)**

**वैरानुबन्धे पतितं नृलोकं दृष्ट्वा भवानी निजदृष्टिशेषम्।**
**न्यधत्त देवे यदतीव दिग्धं तदस्तु भूत्यै जगदेकपथ्यम् ।।1।।**[16]

द्रौणाचार्यः अयि भोः, युधिष्ठिरप्रमुखा दुर्योधनप्रमुखाश्च राजकुमाराः! जानन्त्येव भवन्तः। युगेऽस्मिन् भारतीयां व्यवस्थां प्रतिपालयितुं हस्तिनापुर-राजकीय-गुरुकुले क्षात्रधर्मोचितं धनुर्वेद-विद्याव्रतं प्रवर्तमानं वर्तते।

**शस्त्रेण रक्षिते राष्ट्रे राष्ट्रधर्मः प्रवर्तते।**
**शस्त्रसञ्चालने तस्मादेकाग्रीक्रियतां मनः ।।8।।**[17]

एकाग्रभारतमिति नाटके बहूनि पात्राणि वर्तन्ते । एतेषु अन्यतमः पाण्डवीनां कौरवाणाञ्च सर्वेषां गुरुः द्रोणाचार्यः वर्तते। युधिष्ठि-रार्जुनभीमसेननकुलसहदेवाः इत्यादयः पञ्च पाण्डवाः आसान्। एतेषु प्रमुखः ज्येष्ठश्च राजकुमारः युधिष्टिरः आसीत् । शत कौरवेषु प्रमुखः ज्येष्ठश्च राजकुमारः दुर्योधनः आसीत् ।

**शब्दार्थप्रकाशः –**

आचार्यवर्यस्य रामलखनपाण्डेयस्य महत्त्वपूर्णः काव्यशास्त्रग्रन्थः शब्दार्थप्रकाशः वर्तते। शब्दार्थौ विना काव्यं न भवति। शब्दार्थप्रकाशः अत्यन्तंमहत्त्वपूर्णः काव्यशास्त्रग्रन्थः विद्यते। अस्मिन् ग्रन्थे शब्दार्थयोः साहित्यं प्रतिपाद्यविषयः वर्तते। शब्दार्थौ विभिन्नार्थेषु प्रयुक्तः वर्तेते। शब्दार्थयोः प्रकाशः शब्दार्थप्रकाशः उच्यते। संस्कृतसाहित्ये नव्यचिन्तनपरम्परायां "शब्दार्थप्रकाशः" इत्ययं ग्रन्थः एकः विशिष्टः कोशः इव विराजते। अस्य रचयिता रामलखनपाण्डेयमहोदयः साहित्यदर्शनस्य सूक्ष्मविवेचकः, कवित्व-प्रतिभायुक्तः च भाव्यते। एषः ग्रन्थः संस्कृतभाषायां काव्यचिन्तनं, तत्त्वमीमांसा, शब्दार्थद्वन्द्वस्य स्वरूपम्, तयोः सहजीवनम्, रससिद्धान्तः च बहुविधतया प्रतिपादयति।

आचार्यवर्यस्य रामलखनपाण्डेयस्य महत्त्वपूर्णः काव्यशास्त्रग्रन्थः शब्दार्थप्रकाशः वर्तते । शब्दार्थौ विना काव्यं न भवति । अस्मिन् विषये **आचार्येण भामहेन** उक्तम् -

**शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च द्विधा ।**[18]

आचार्यरुद्रटोऽपि निगदति

**शब्दार्थौ काव्यम् ।**[19]

**'शब्दार्थप्रकाशः'** नामक एषः प्रबन्धः साहित्यदर्शने विशेषं स्थानं धारयति। अस्य मूलप्रवृत्तिः शब्दस्य अर्थस्य च पारस्परिकसम्बन्धस्य विश्लेषणं, साहित्ये तयोः ऐक्यस्य महत्त्वं च प्रतिपादयति। सम्पूर्णं काव्यं द्वन्द्वात्मकम् अस्ति यत् शब्दार्थयोः द्वन्द्वं, काव्यशास्त्रस्य मूलाधारो भवति। अयं प्रबन्धः न केवलं काव्यचिन्तनस्य दार्शनिकं

स्वरूपं प्रतिपादयति, अपि तु काव्यस्य लोकोपयोगिता, रसात्मकता, लोकोत्तरत्वं च विस्तरेण प्रकाशयति।

भारतीयसाहित्यपरम्परायां काव्यं केवलं मनोरञ्जनस्य साधनं न, अपितु चिन्तनं, साधना, तथा लोकमंगलस्य सशक्तं माध्यमं भवति। काव्यं यत्र शब्दस्य सौन्दर्यं, अर्थस्य गाम्भीर्यं च एकत्वेन दृश्यते, तत्र एव साहित्यं स्फुरति। एतस्मिन् सन्दर्भे "शब्दार्थप्रकाशः" इत्ययं संस्कृतप्रबन्धकाव्यं साहित्यदर्शनस्य आधारतत्त्वानि विमृशन्, शब्दार्थयोः पारस्परिकसम्बन्धं, काव्यस्य लोकोत्तरस्वरूपं च सूक्ष्मतया प्रतिपादयति। अस्मिन् काव्ये कविः स्पष्टतया प्रतिपादयति यत् "शब्द तथा च "अर्थ" न केवलं काव्ये उपादानभूतौ भवतः, अपि तु तयोः समन्वय एव साहित्यस्य हृदयम् अस्ति। शब्दं विना अर्थो न सम्पूर्णः, तथा च अर्थं विना शब्दः न प्रभावकारी । कविः इदं प्रतिपादयति यत्, काव्ये न केवलं भाषासौन्दर्यम् अपेक्षितम्, अपितु भावसारसंपन्नता अपि आवश्यकैव। एतदर्थं **"शब्दार्थद्वन्द्व"** एव काव्यसृष्टेः मूलाधारः भवति इति स्पष्टं सन्देशं दत्तवान् अस्ति।

"शब्दार्थप्रकाशः" प्रबन्धे कविः लौकिकतया चालितं समाजं प्रति आह्वानं करोति यत् काव्यं केवलं रसनिर्माणाय न, अपि तु समाजसुधाराय, हृदयविकारनिवारणाय, लोकोत्तरदृष्टेः विकासाय च साधनम् अस्ति। अस्मिन् ग्रन्थे बहुशः स्थानेषु कविः तत्त्वचिन्तनं, भावात्मकता, आध्यात्मिकता च मिलित्वा प्रस्तुतवान् अस्ति।

अतः "शब्दार्थप्रकाशः" केवलं नाममात्रेण न, अपि तु साहित्ये शब्दार्थयोः सह अस्तित्वस्य प्रकाशः, काव्यस्य ब्रह्मरूपत्वस्य घोषकः च। एषः काव्यग्रन्थः समकालीनसाहित्ये अपूर्वं चिन्तनमार्गं प्रदर्शयति, यत्र शब्दार्थौ न केवलं द्वन्द्विनौ, अपि तु सहकारिणौ भवतः। एवं बहुविधदृष्ट्याः सम्पन्नं एतत् काव्यं "शब्दार्थप्रकाशः" संस्कृतसाहित्ये न केवलं एकं अमूल्यं रत्नं, अपि तु साहित्यदर्शनस्य तेजस्वी दीपः इति न्यायोचितं कथयितुं शक्यते।

अतः अयं ग्रन्थः न केवलं कवीनां कृते अपितु समीचीनपाठकानां, साहित्यचिन्तकानां, भाषाविदां च दृष्ट्या अपि अतिशयोपयोगीः। अस्य पाठेन न केवलं वाङ्मयस्य रहस्यं ज्ञायते, अपितु जीवनेऽपि सहानुभूतिपूर्वकं चिन्तनं समुत्पद्यते।

**शोधस्योद्देश्यानि-**

**"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते"** अस्या उक्तेरनुसारं प्रयोजनरहिते कस्मिन्नपि कर्मणि मन्दजनोऽपि संलग्नो न भवति। अतः प्रस्तुतशोधपत्रस्य निम्नलिखितानि उद्देश्यानि सन्ति -

1. आचार्यरामलखनपाण्डेयस्य व्यक्तित्वस्य जीवनवृत्तस्य च परिचयं प्रदातुम्।
2. आचार्यपाण्डेयस्य प्रमुखकृतीनां गानायन्याः, गीतिकालहर्याः, एकाग्रभारतस्य, शब्दार्थप्रकाशस्य, शाकुन्तलं धर्मविज्ञानम् इत्यासां परिचयं दातुम्।
3. गानायनीगीतिकाव्यस्य त्रिविधवस्तुविभागस्य मानवगीतेः, संस्कृतगीतेः, भावाञ्जलेश्च विश्लेषणं कर्तुम्।
4. गीतिकालहर्याः गीतीनां विषयवैविध्यस्य, काव्यगतवैशिष्ट्यस्य च निरूपणं कर्तुम्।
5. एकाग्रभारतनाटकस्य पञ्चानामङ्कानां कथावस्तुनः, पात्राणां, रसयोजनायाश्च समीक्षां कर्तुम्।
6. शाकुन्तलं धर्मविज्ञानम् इति ग्रन्थे कालिदासीयशाकुन्तले धर्मविज्ञानस्य या समीक्षा कृता तस्याः आलोचनां कर्तुम्।
7. आचार्यपाण्डेयस्य आधुनिकसंस्कृतसाहित्ये योगदानस्य मूल्याङ्कनं कर्तुम्।

**निष्कर्षः**

आचार्यरामलखनपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य एकः प्रतिभा-शाली स्रष्टा अस्ति । तस्य बहुमुखप्रतिभा तस्य विविधासु कृतिषु दृश्यते। गीतिकाव्यक्षेत्रे गानायनी गीतिकालहरी च तस्य कवित्वप्रतिभायाः उत्कृष्टं निदर्शनम्। नाटकक्षेत्रे एकाग्रभारतम् अद्वितीयं योगदानम्, यत्र एकाग्रतायाः राष्ट्रधर्मस्य च महत्त्वं प्रतिपादितम्। काव्यशास्त्रक्षेत्रे शब्दार्थप्रकाशः शब्दार्थयोः साहित्यस्य गभीरं विवेचनं प्रस्तौति। समीक्षाक्षेत्रे शाकुन्तलं धर्मविज्ञानम् इति ग्रन्थः धर्मयुक्तविज्ञानस्य महत्त्वं प्रतिपादयति।

एवम् आचार्यपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य संवर्धने अपूर्वं योगदानं अकरोत् । तस्य कृतयः न केवलं साहित्यदृष्ट्या अपि तु सामाजिकदृष्ट्या अपि अत्यन्तं महत्त्वपूर्णाः सन्ति। तासु रचनासु भारतीयसंस्कृतेः, धर्मस्य, राष्ट्रचेतनायाः, मानवमूल्यानाञ्च गभीरं दर्शनं लभ्यते। आधुनिकसंस्कृतसाहित्ये तस्य स्थानं चिरस्मरणीयम्।

**ग्रन्थसूची**

1.पाण्डेयः, रामलखनः, (वि. 2063). गानायनी लखनऊ गोतमीनगर : मंजु प्रकाशन ।

2.पाण्डेयः, डॉ रामलखन, (2014). गीतिकालहरी लखनऊ गोतमीनगर : हपर्वाप्रकाशन ।

3.पाण्डेयः, रामलखनः, एकाग्रभारतम्, राष्ट्रियसंस्कृतसंस्थानम्, लक्ष्मणपुरी।

4.पाण्डेयः, रामलखनः, शब्दार्थप्रकाशः, राष्ट्रियसंस्कृतसंस्थानम्, लक्ष्मणपुरी।

5.पाण्डेयः, रामलखनः, शाकुन्तलं धर्मविज्ञानम्, राष्ट्रियसंस्कृत-संस्थानम्, लक्ष्मणपुरी।

6. भरतमुनिः , नाट्यशास्त्रम्, चौखम्बा विद्याभवन, वाराणसी।

7. धनञ्जयः , दशरूपकम्, मोतीलाल बनारसीदास, दिल्ली।

8. मम्मटाचार्यः , काव्यप्रकाशः, चौखम्बा सुरभारती, वाराणसी।

9. विश्वनाथः , साहित्यदर्पणः, मोतीलाल बनारसीदास, दिल्ली।

10. आनन्दवर्धनः , ध्वन्यालोकः, चौखम्बा विद्याभवन, वाराणसी।

11. भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरीज, वाराणसी।

12.आचार्यः, डॉ. सत्यनारायण, (2005). संस्कृतशोधप्रविधिः तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम् ।

13. पाण्डेय , डॉ रामलखन, ( 0000 ). सत्रहवी शताब्दी के संस्कृत महाकाव्य , लखनऊ गोतमीनगर : नाग पब्लिशर्स .

14. द्विवेदी, डॉ. कपिल, (2020). अभिज्ञानशाकुन्तलम् संस्करण , इलाहाबाद : विश्वभारती अनुसंधान

**सन्दर्भ ग्रन्थः**

[1]गानायनी

[2]गानायनी पृष्ठ - 2

[3]एकाग्रभारतम् 1/8

[4]शब्दार्थप्रकाशः – 3

[5]शाकुन्तलं धर्मविज्ञानम् भूमिका

[6]गानायनी

[7]गानायनी

[8]गानायनी

[9]गानायनी

[10]गानायनी

[11]गानायनी

[12]गानायनी

[13]गानायनी

[14]गानायनी

[15]गानायनी

[16]एकाग्रभारतम् 1 /1

[17]एकाग्रभारतम् 1 /1

[18]काव्यालंकारः – भामहः 1/16

[19]काव्यालंकारः – रुद्रट 2/1